International Journal of Sanskrit Research 2018; 4(6): 73-74

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 73-74
© 2018 IJSR
www.anantaajournal.com
Received: 15-09-2018
Accepted: 16-10-2018

**प्रवीण कुमार**
शोधच्छात्र, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, भारत

**Correspondence**
**प्रवीण कुमार**
शोधच्छात्र, राष्ट्रिय संस्कृत संस्थान, नई दिल्ली, भारत

# संस्कृतकथायाः स्वरूपं महत्वं च

**प्रवीण कुमार**

**प्रस्तावना**

संस्कृत–कथासाहित्यस्य प्राचीनस्वरूपं तु वेदेषु एव दृश्यते। भारतीयसाहित्यपरम्परायामस्याः कथाप्रकथनरूपायाः प्रवृत्तेः मूलरुपेण अतीव प्राचीनपरम्परा वर्तते। कथानां विकासक्रमः तु स्पष्टरुपेण गद्यकाव्येषु अपि उपलब्धो भवति। तत्र प्रमुखरुपेण ''वासवदत्ता, कादम्बरी, दशकुमारचरितम्, पन्चतन्त्रम् हितोपदेशः, हर्षचरितम्, तिलकमञ्जरी, वेतालपञ्चविंशतिका, विक्रमस्य सिंहासनद्वयत्रिंशतिका, गुणाढ्यविरचिता बृहत्कथायापि अद्य स्वीयं भूतभाषामयं वपुः विस्मृत्य विलक्षणम् देववाग्विग्रहं गृहीत्वा कथासरित्सागरः, बृहत्कथामञ्जरी, बृहत्कथाश्लोकसंग्रहरुपेण विलसित। विश्वसाहित्यमतानां कथासाहित्यस्याध्ययनेन ज्ञायते यत् कथानां यावन्ती प्राचीनतमा, विशालतमा, उदात्तमा च परम्परा संस्कृते प्राप्यते न तथान्यत्र। भारतवर्षे वर्तमान समाजे वेगेन परिवर्तनं दृश्यते। तेषां संश्लेषणमपि कथायां दृश्यते।

**1. कथायाः स्वरूपम्:** कथा शब्दस्य व्युत्पत्तिः कथ् धातुना ''चितिपूजिकथिकुम्बिचीजवश्चेति'' सूत्रेण अङ् प्रत्ययेन स्त्रीलिङ्गे ''अजाद्यष्टाप्'' सूत्रेण टाप् प्रत्ययेन प्रबन्धात्मकविवेचनं नाम कथा इति।

कथायाः स्वरूपं विषये साहित्यदर्पणकारः कविराजविश्वनाथेन प्रतिपादितम्–

''कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्
क्वचिद् भवेदार्या क्वचिद् वक्त्रापवक्त्रके।
आदौ पद्ये नमस्कार खलादे वृत्तकीर्तनम्।। [1]

अयं भाव : यत् कथायां कथावस्तुः सरला, सरसा च भवति। सम्पूर्णाः कथावस्तुः गद्येरेव निबद्धाः भवति। कथायां क्वचिद् कथायाः प्रारम्भे दुष्टानां देवतानां वा केचनपद्यैः नमस्कार क्रियते।
अग्निपुराणस्यानुसारं कथायाः लक्षणम्– कथायाः प्रारम्भे कथाकारः केचनश्लोकेषु स्वकीयवंशस्य संक्षेपे वर्णयति। मुख्यकथावस्तुनो विकासस्य कृतेऽवान्तरकथानां प्रयोगो भवति। तत्र परिच्छेदानामाभावः भवति। तत्र कथां कदा–कदा–लम्भकेषु विभज्यते। तां कथाः कथ्यते। उक्तं च–

''श्लोकैः स्ववंशसंक्षेपात् कविर्यत्र संशति
मुख्यार्थस्यावतराय भवेद्यत्र कथान्तरम्।
परिच्छेदो न यत्र स्याद् भवेदालम्बकैः क्वचिद् सा कथा''। [2]
आचार्यहेमचन्द्रानुसारेण– ''धीरशान्तनायकः गद्येन–पद्येन वा सर्वभाषा कथा। [3]
वाचस्पत्यमानुसारेण– प्रबन्धकल्पना स्तोकं सत्यां प्राज्ञाः कथा विदुः।
परम्परायश्रयाः या स्यात् सा मताख्यायिका बधैः। [4]
माघेन शिशुपालवधे तथा श्रीहर्षस्य नैषधीयचरिते कथाशब्दस्य प्रयोगः ''वार्ताः'' प्रसंगे इत्यर्थे प्राप्यते। [5]

**2. कथायाः भेदाः** कथायाः भेदानधिकृत्य विदवत्सु प्रायो मतभेदाः दृश्यन्ते। कथायाः निश्चितं भेदकरणमेकं दुसाध्यं कार्य वर्तते। केचन् विद्वांसः कथायाः शैल्याः आधारेण केचन् विद्वांस : आकारदृष्टया कथायाः भेदकार्यं स्वीकृत्वन्तः।

**2.1 शैल्याः आधारेण कथयाः भेदाः–** शैलीराधारेण कथायाः द्वौ भेदौ स्वीकृतम्।
(क) कथा (ख) आख्यायिका चेति। [6]

**2.2 आकारदृष्ट्याः कथायाः भेदाः** आकारदृष्ट्या कथायाः द्वौ भेदौ विद्वद्भिः स्वीकृतम्
(क) दीर्घकथाः (ख) लघुकथा : चेति। [7]

**2.3 कथावस्तुनः आधारे कथायाः भेदाः** इति वृत्तस्याधारे धनञ्जयमहोदयेन दशरूपके कथायाः तिस्त्रः भेदाः स्वीकृतम्–
(क) ऐतिहासिककथाः (ख) काल्पनिककथाः (ग) मिश्रितकथाः चेति। [8]

**2.4 आचार्यानन्दवर्धनानुसारेणः** आचार्यानन्दवर्धनेन स्वकीय ग्रन्थे ''ध्वन्यालोके'' कथायाः तिस्त्रः भेदाः प्रतिपादितवान्–
(क) परिकथा (ख) सकलकथा (ग) खण्ड़कथा। [9]

**2.5 अग्निपुराणेऽपि कथायाः पञ्चभेदाः प्राप्यते–**
(क) आख्यायिका (ख) कथा (ग) खण्डकथा (घ) परिकथा
(ड़) कथनिका [10]




अनेन प्रकारेण ज्ञायते यत् कथायाः नाना भेदाः विद्वद्भिः स्वीकृताः।

**3. कथायाः अङ्गानिः** कथायाः लघुकथायाः वा वैशिष्ट्यथवा तस्याः अङगानां विवेचनमाधुनिकसंस्कृतकथा प्राचीन–संस्कृतकथाभ्यः शिल्पभावदृष्ट्या सर्वथा भिन्नमिति सर्वैः मन्यते। यतेहि आधुनिक संस्कृतकथा आंग्लभाषया तथा अन्यभारतीय भाषाभिः प्रभाविताः वर्तते। आधुनिक–समीक्षाकाणां मतानुसारं कथायाः षड् तत्वानि निर्धारितानि सन्ति। तेषां संक्षिप्तपरिचयो मया प्रस्तूयतेऽत्र।

**3.1 कथानकम्:** कस्यचिदपि कार्यस्य अपेक्षितपूर्णता प्राप्तयं काचित् निश्चिता पूर्वयोजनावश्यकं मन्यते। तथैव कथायाः सफलतायै–कथानके कथायाः सम्पूर्णाः विषयवस्तुः भवति। संस्कृतकथानां कथावस्तु क्रमबद्धं, रोचकश्च, भवेत। जीवनस्य विभिन्नानां परिष्ठितीमाधारेण निर्मिताः कथाः लेखकस्य मौलिकतायाः परिचायिकाः भवति। कथायाः प्रथमो चरणो भवति कथानकम्।

**3.2 चरित–चित्रणम्:** संस्कृत कथाग्रन्थेषु द्विप्रकारकं पात्रं मिलति। तथा पशुपक्षिणः मानवाश्च। कथासु पात्राणां बाहुल्यं लेखकस्य मूलभावं स्पष्टं कुर्वन्ति। पात्रचरित्रचित्रेणेन कथानकस्य विस्तारो भवति।

**3.3 कथोपकथनम्:** कथोपकथनमेव कथायाः प्राणाः मन्यन्ते। यतोहि कथोपकथनं विना कथानकस्य कल्पनापि न कर्तुं शक्यते। पात्रचरित्रचित्रणस्य विकासमपि कथोपकथनेन भवति। कथायां कथोपकथनाः रूचिकराः, सरलाः, संक्षिप्तायुक्ताः भवेयुः।

**3.4 देशकालवातावरणम्:** कथायाः तत्वेषु देशकालवातावरणस्य महत्वपूर्णं स्थानं भवति। सफला कथा या भवति यत्र देशकाल–वातावरणस्य स्मयक् चित्रणं भवति।

**3.5 भाषाशैलीः** संस्कृतकथानां भाषाशैली सरला सरसा, बोधगम्या, प्रवाहपूर्णा भवति। सम्पूर्णा कथा गद्यात्मिका न भवति। मध्ये–मध्ये पद्यमपि भवति। इयमेव शैली विविधता भवति।

**3.6 उद्देश्यम्:** कथायाः महत्वपूर्णं तत्वमुद्देश्यं भवति। कथायाः उद्देश्यं सर्वदा सारयुक्तः भवेत्। कथायाः उद्देश्यं न केवलं मनोरञ्जनमात्रं भवेत्। अपितु पुरुषार्थ प्राप्तिः भवेत्। लोकनीति–राजनीति–आचारशिक्षादयः कथायाः उद्देश्यं भवेयुः।

**4. कथायाः महत्वम्:** कथासाहित्यं जनानां कृते आदि–प्रवर्तते। कथा अद्यापि मनोरञ्जनेन साकं ज्ञानात्मक–नैतिक–आचार–शिक्षादीनां स्त्रोतः अस्ति। पुराकालादेव अस्याः महत्वमस्माभिः स्वीकृतम्। कथायाः प्रयोगः तदानीमाचारस्य लोकव्यवहारस्य च शिक्षा–दीक्षयोः कृते ज्ञानम्, जनानां चारित्रिकविकासः, सामाजिकतायाः विकासः, नैतिकतायाः विकासश्च भवति। वर्तमानकाले समाजे व्याप्ताः समस्याः यथा पारिवारिकसमस्याः, आतंकवाऽस्य समस्याः, सांस्कृतिकसमस्याः अस्पृश्यताः, राजनैतिक–समस्याः, भ्रष्टाचारस्य समस्याः आदयः समस्याः समाजे समक्षोपरिस्थिरताः सन्ति। कथानां माध्यमेन आसां कथानां विषये जनजागरणमेव कथाकारस्य मूलोद्देश्यं प्रतीयते। कथानां माध्यमेनैव वयं ज्ञानात्मकं भावात्मकं, चरित्रात्मकं, सामाजिकव्यहारात्मकं ज्ञानं प्राप्नुमः। येन माध्यमनैव राष्ट्रस्य विकासं भवति। यथा–

> मातृवत्परदारेषु परद्रव्येषुलोष्ढवत्
> आत्मवत् सर्वभूतेंषु यः पश्चति सः पण्ड़ितः।

**5. सन्दर्भ**


1. साहित्यदर्पणः– षष्ठपरिच्छेदः कारिका– पृष्ठ 332–333, विश्वनाथ
2. अग्निपुराणः पृष्ठ 336–15–17
3. काव्यानुशासन, अध्याय–8, पृष्ठ 405–406
4. वाचस्पत्यम्– पृष्ठ 1639
5. शिशुपालवध– 2.40
6. अमरकोष– 1.32 / 322
7. दशरूपक, अध्याय–1.15
8. तत्रैव
9. ध्वन्यालोक– आनन्दवर्धनाचार्य– प्रद्याते–3, पृष्ठ 141
10. अग्निपुराण– पृष्ठ–337